**संस्कृतवार्ता:**

**दिनाङ्क :-23.10.2024** **प्रात: - 06:55**

**अथ वार्ता:**

**प्रधानमन्त्री – सम्बोधनम्**

प्रधानमन्त्री नरेन्द्रमोदी अद्य रूसदेशस्यकजान-नगरे ब्रिक्सइति शिखर सम्मेलनवधौ चीनदेशीयेन राष्ट्रपतिना शी-जिनपिंग इत्यमुना साकं द्विपक्षीय -सम्वादं करिष्यति। उपवेशनमिदं वास्तविक-नियन्त्रण-रेखाया: प्रहरित्वप्रबन्धनम् आधृत्य चीनभारतदेशयोर्मध्ये सजातनिर्णायस्य अनन्तरं महत्वपूर्णमस्तीति। प्रधानमन्त्रिण: श्रीमोदिन: चीनदेशस्य राष्ट्रपते: मध्ये एतत् उपवेशनं विगतेषु पञ्चवर्षेषु प्रथमं सुनियोजितम् उपवेशनं भविष्यति। श्रीमोदी एतदनन्तरं ब्रिक्ससम्बद्ध-सत्राणि सम्बोधयिष्यति। तदनु रूस-ईरानदेशयो: राष्ट्रपतिभ्यां सह द्विपक्षीयवार्ता: करिष्यति। ह्य: श्रीपुतिनेन साकं जाते उपवेशने श्रीमोदी सबलं प्रतिपादितवान् यत् भारतं रूस-यक्रेन-देशयो: सङ्घर्षस्य शान्तिपूर्णसमाधानाय साहाय्यं दास्यति। विदेशसचिव: विक्रममिस्री इत्येष: वार्ताहरान् सम्बोधितवान् यत् श्रीमोदी राष्ट्रपतिना श्रीपुतिन इत्यनेन साकं जातस्य सम्वादस्य विषये सूचना प्रदत्ता।

**प्रवर्तननिदेशालय:**

प्रवर्तननिदेशालयेन सीम्नि मादक-द्रव्यपदार्थानाम् अवैध-आदान-प्रदान-प्रक्रियया सम्बद्धस्य धनशोधन-निवारण-अधिनियमस्य अन्तर्गतं निरीक्षणस्य प्रकरणे षड् जना: निगडिता:। निदेशालयेन मुम्बईनगरस्य न्हावा-शेव-जलपोतस्थानकस्य आगतात् संग्रहणात् त्रिनवत्यधिकद्विशतं किलोग्राममितं यावत् हीरोइन इति मादकद्रव्यानि गृहीतानि।

**करतारपुर-भारतं**

भारत-पाकिस्तान-देशौ श्रीकरतारपुर-साहिब-वीथे: सहभागिताया: वैधताया: पञ्चवर्षाणाम् अवधिं संवर्धयितुं सहमतौ जातौ। करतारपुर-साहिब-वीथे: माध्यमेन भारतदेशत: पाकिस्तानस्य गुरूद्वारा-दरबार-साहिब इत्यत्र यावत् तीर्थयात्रिणां यात्रासौकर्यार्थं नवदशाधिक-द्विसहस्रतमवर्षस्य अक्टूबर मासस्य चतुर्विंशतिदिनांके सहभागिताज्ञापनपत्रे हस्ताक्षरं जातम् यद्धि

पञ्चवर्षाणाम् अवधिं यावत् वैधमासीत् इति।

**राष्ट्रपति: सिङ्गापुरदेश:**

सिङ्गापुरस्य रक्षामन्त्री डॉ. एन.जी. इंग हेन इत्येष: ह्य: राष्ट्रपतिभवने राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया साकं मन्त्रणां कृतवान् । अत्रावसरे राष्ट्रपति: कथितवती यत् भारतसिङ्गापुरदेशयोमध्ये द्विपक्षीयसहयोगस्य समृद्धं इतिवृत्तमस्ति। राष्ट्रपति: अग्रे प्रोक्तवती यत् प्रधानमन्त्रिण: श्रीमोदिन: साम्प्रतिके एव समये निष्पन्नाया: सिङ्गापुरयात्राया: अपि च सिङ्गापुर-भारतयोर्मध्ये मन्त्रिस्तरीय-

वर्तुलाकार-उपवेशनस्य अनन्तरम् अयं सम्बन्ध: इतोऽपि सुदृढो जात: । येन हि उभौ देशौ व्यापक-रणनीतिक-सहभागिताया: स्तरं संवर्धितवन्तौ।

**आई एफ एफ आई इति**

अस्य वर्षस्य भारतीय-अन्ताराष्ट्रियचलचित्र-महोत्वसाय प्रतिनिधि-पञ्जीकरणं समारब्धम्। पञ्चचपञ्चाशत्तम: अयं चलचित्र-महोत्सव: नवम्बरमास्य विंशतिदिनांकात् अष्टाविंशतिदिनांकं यावत् गोवानगरे आयोजयिष्यते। चलच्चित्रप्रेमिण: **my.iffigoa.org** इत्यत्र पंजीयनं कारयितुं शक्नुवन्ति।

**भारतक्रिकेटिति**

क्रिकेटप्रतिस्पर्धायां, भारतन्यूजीलैण्डदलयोर्मध्ये द्वितीया क्रिकेट निकषस्पर्धा श्व: पुणेनगरस्य महाराष्ट्र-क्रिकेट-सङ्घ-क्रीडाङ्गणे प्रात: सार्धनववादनतो भविष्यति।

**।।इति वार्ता:।।**